संस्कृत भारती

अक्षरम्, ८ उपमार्गः, २ घट्टः गिरिनगरम्, बेङ्गलूरु - ५६० ०८५.

पत्रालयद्वारा संस्कृतम्

संस्कृतम् संस्कृतम् संस्कृतम् संस्कृतम् संस्कृतम्

KOVIDA -7

Bk. Demin 2001

ॐ

॥ जयतु भारतम् - जयतु भारती ॥

संस्कृतभारती

पत्रालयद्वारा संस्कृतम्

SAMSKRIT THROUGH CORRESPONDENCE

Aksharam, 8th Cross, 2nd Phase, Girinagar, Bangalore-560 085

कोविदः - ७

सप्तमः पाठः

॥ दुर्जनैः सह सम्पर्कः शत्रुतापि न राजते ॥

Neither the company nor the enemity of the wicked is desirable.

१. सुभाषितानि

१३. दूरीकरोति दुरितं विमलीकरोति
चेतश्चिरन्तनमघं चुलुकीकरोति ।
भूतेषु किञ्च करुणां बहुलीकरोति
सत्सङ्गतिः कथय किं न करोति पुंसाम् ॥

पदविभागः

दूरीकरोति, दुरितम्, विमलीकरोति, चेतः, चिरन्तनम्, अघम्, चुलुकीकरोति, भूतेषु, किम्, च, करुणाम्, बहुलीकरोति, सत्सङ्गतिः, कथय, किम्, न, करोति, पुंसाम्।

अन्वयः

(सत्सङ्गतिः) दुरितं दूरीकरोति, चेतः विमलीकरोति, चिरन्तनम् अघं चुलुकीकरोति, किं च भूतेषु करुणां बहुलीकरोति, कथय, सत्सङ्गतिः पुंसां किं न करोति ?

अन्वयार्थः

(सत्सङ्गतिः = सज्जनानां सहवासः) दुरितं = दुष्टविषयं, दूरीकरोति = निवारयति, चेतः = मनः, विमलीकरोति = स्वच्छं करोति, चिरन्तनं = पुरातनम्, अघं = पापं, चुलुकीकरोति = भस्म करोति, किं च = अपि च, भूतेषु = प्राणिषु, करुणां = दयां, बहुलीकरोति = अधिकां करोति, कथय = वद, सत्सङ्गतिः = सज्जनानां सहवासः, पुंसां = पुरुषाणां, किं न कराति ? = (अन्यत्) किं न साधयति ?

तात्पर्यम्

लोके सर्वेषां जनानां स्नेहिताः भवन्ति एव । तेषु स्नेहितेषु सज्जनानां संख्या तु न्यूना एव । यतः स्वार्थपराः एव अधिकाः सन्ति लोके । तथापि अस्माभिः सज्जनानां सहवासः एव करणीयः इति वदन् सुभाषितकारः तत्र कारणमपि एवं वदति- सज्जनानां सहवासेन पुरुषाणां मनसि स्थिताः दुष्टाः विचाराः दूरं गच्छन्ति । मनः शुद्धं भवति । पुरा कृतं पापमपि भस्म भवति । अपि च प्राणिनां विषये दया अधिका भवति । अतः सज्जनानां स्नेहः मनुष्याणां किं वा न करोति ? अर्थात् सर्वविधमङ्गलानि अपि जनयति ।

१४. किं चन्द्रमाः प्रत्युपकारलिप्सया
करोति गोभिः कुमुदावबोधनम् ।
स्वभाव एवोन्नतचेतसां सतां
परोपकारव्यसनं हि जीवितम् ।

पदविभागः

किम्, चन्द्रमाः, प्रत्युपकारलिप्सया, करोति, गोभिः, कुमुदावबोधनम्, स्वभावः, एव, उन्नतचेतसाम्, सताम्, परोपकारव्यसनम्, हि, जीवितम् ।

अन्वयः

चन्द्रमाः गोभिः कुमुदावबोधनं प्रत्युपकारलिप्सया करोति किम् ? उन्नतचेतसां सतां स्वभावः एव (सः) । (तेषां) जीवितं परोपकारव्यसनं हि ।

अन्वयार्थः

चन्द्रमाः = चन्द्रः, गोभिः = किरणैः, कुमुदावबोधनं = कुमुदपुष्पाणां विकासनं, प्रत्युपकारलिप्सया = प्रत्युपकारं प्राप्तुम् इच्छन्, करोति किम् ?

उन्नतचेतसां = उदात्तचित्तानां, सतां = सत्पुरुषाणां, स्वभावः एव (सः) । (तेषां) जीवितं = जीवनं, परोपकारव्यसनं हि = परोपकाररूपेण व्यसनेन युक्तमेव भवति किल ।

तात्पर्यम् -

चन्द्रः स्वकिरणैः कुमुदपुष्पाणि विकासयति । किन्तु 'एतानि कुमुदपुष्पाणि मम प्रत्युपकारं कुर्वन्तु' इति इच्छा तस्य मनसि कदापि न भवति । स तु अतीव सहजरूपेण तत् कार्यं करोति । एतादृशः परोपकारः उदारचित्तानां महात्मनां स्वभावः एव भवति । परोपकाररूपं व्यसनं सर्वदा तेषां जीवने भवति एव । कस्मात् अपि प्रत्युपकारस्य निरीक्षाम् अकृत्वा एव ते स्वभावसहजया प्रवृत्त्या सर्वेषाम् अपि उपकारं कुर्वन्ति ।

२. काव्यकथा

[1]उपवनात् प्रस्थितः हंसः विदर्भदेशं प्राप्तवान् । राजधान्यां कुण्डिनपुरे सः एकम् उद्यानं गतवान् । तत्र एव दमयन्ती सखीभिः सह आगतवती । सुवर्णहंसं दृष्ट्वा दमयन्ती चकिता अभवत् । सा 'कोलाहलः न कर्तव्यः' इति सखीः सूचितवती । ततः एकाकिनी एव सा तं हंसं ग्रहीतुम् उद्युक्ता । हंसः अपि दमयन्तीं बहु दूरं नीतवान् । एकान्ते हंस-दमयन्त्योः सम्भाषणम् आरब्धम् । हंसेन उक्तम्- 'अहं सामान्यः हंसः न । मां बन्द्धुं सः नलः एव समर्थः । नलः विद्यावान्, रूपवान्, गुणवान् च' इति । एवं नानाप्रकारैः नलमहाराजं वर्णयित्वा नलस्य विषये दमयन्त्याः भावं ज्ञात्वा ततः- 'नलः अपि भवतीम् इच्छति' इति उक्तवान् हंसः । तदा दमयन्ती नलं मनसा स्वीकृतवती । तया उक्तम् - ''हंस ! मम जीवनम् एव समर्पयितुम् अहं सिद्धा । मदीयम् अनुरागभावं नलाय निवेदय'' इति। हंसः अपि शीघ्रं विदर्भदेशं परित्यज्य पुनः निषधदेशं प्राप्तवान् ।

हंसस्य निर्गमनात् अनन्तरं दमयन्ती [2]प्रासादं गता । सा मनसि नलम् एव चिन्तयन्ती बहु दुःखिता अभवत् । मन्मथबाधा आरब्धा । सा सर्वत्र

1. from the garden, 2. towards palace (mansion)

नलमहाराजम् एव पश्यति स्म । रात्रौ चन्द्रकिरणेषु सत्सु अपि विरहतापेन पीडिता भवति स्म । एवं बहुप्रकारैः विरहपीडिता सती सा शरीरेण अपि कृशा, [3]पाण्डुरा च जाता । एतादृशीम् अवस्थां प्राप्तवतीं दमयन्तीं विलोक्य भीमराजस्य वैद्यः, [4]अमात्यः च राजानम् उक्तवन्तौ - ''राजन् ! तव पुत्र्याः विवाहमहोत्सवं स्वयंवरपद्धत्या [5]निर्वर्तय'' इति । भीमराजः अपि स्वयंवरं कर्तुं निश्चितवान् । अतः सः सर्वेभ्यः नृपेभ्यः स्वयंवरस्य आह्वानं प्रेषितवान् । इयं वार्ता देवलोकम् अपि प्राप्ता । नारदः इमां वार्तां श्रुत्वा [6]अमरावतीं गतवान् । तेन सह पर्वतः इति ऋषिः अपि आसीत् । तौ द्वौ अपि इन्द्रसभां गतवन्तौ । सभाजनाः सर्वे अपि [7]उत्थाय गौरवं दर्शितवन्तः । कुशलसम्भाषणम् आरब्धम् । इन्द्रः उक्तवान् - 'नारदमहर्षे ! आत्मीयानां सहवासेन आनन्दः भवति । पुण्यवन्तः नृपाः पूर्वं स्वर्गम् आगच्छन्ति स्म, गच्छन्ति स्म च । सम्प्रति राजानः अत्र न आगच्छन्ति । इदानीं [8]नलशासनकालः । किमर्थं राज्ञां [9]गमनागमनं नास्ति ?' इति । नारदेन उक्तम्- ''महेन्द्र ! यागशतेन इन्द्रपदवी लभ्यते किल ? राजानः पूर्वं यागान् अनुष्ठाय लब्धपुण्याः इह आगच्छन्ति स्म । इदानीं भूमौ भीमराजस्य पुत्री दमयन्ती अनुपमा सुन्दरी अस्ति । सर्वे राजानः तस्यां साभिलाषाः स्वर्गं न आयान्ति'' इति । नारदस्य इदं वचनं श्रुत्वा इन्द्रादयः देवाः बहु सन्तुष्टाः । ते अपि दमयन्तीम् अभिलषन्तः भूमिम् आगन्तुम् उत्सुकाः अभवन् । दमयन्तीसौन्दर्यविषयं श्रुत्वा अप्सरसः लज्जिताः अभवन् । ततः इन्द्रादयः अष्ट दिक्पालकाः दमयन्तीं वशीकर्तुं भूमिं प्रति प्रस्थिताः । मार्गे नैषधः नलमहाराजः [10]मिलितः । देवाः तं दृष्ट्वा स्वकीयं सौन्दर्यम् अनिन्दन् । सर्वे स्वीयपरिचयम् अवदन् । इन्द्रः नलं प्रार्थितवान्- 'महाराज ! भवान् अस्माकं दूतकार्यं करोतु । दमयन्तीम् अस्माकम् इच्छां निवेदयतु' इति । नलः अङ्गीकृत्य मायाशरीरेण दमयन्तीसमीपं गतवान् ।

3. pale, 4. minister, 5. (you) perform, 6. city of Indra, 7. after getting up (having got up), 8. during Nala's rule (regime), 9. coming and going (frequent visits), 10. (was) met.

३. श्लोकेषु अन्वयरचनाक्रमः

दिलीपस्य वचनं श्रुत्वा सिंहः कथयति ॥

१३. अथान्धकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन् ।
भूयः स भूतेश्वरपार्श्ववर्ती किञ्चिद्विहस्यार्थपतिं बभाषे ॥

पदविभागः

अथ[1], अन्धकारम्[2], [a]गिरिगह्वराणाम्[3], [b]दंष्ट्राममूखैः[4], शकलानि[5], कुर्वन्[6], भूयः[7], सः[8], भूतेश्वरपार्श्ववर्ती[9], किञ्चित्[10], विहस्य[11], अर्थपतिम्[12], बभाषे[13] ॥

अन्वयार्थः

अथ = Then; भूतेश्वरपार्श्ववर्ती सः = that lion, the attendant of Iswara; गिरिग्रह्वराणाम् अन्धकारम् = the darkness of the caves of the mountain; दंष्ट्रामयूखैः = by the rays of the tusks (large and sharp teeth); शकलानि कुर्वन् = making into pieces; किञ्चित् विहस्य = smiling a little; अर्थपतिम् = (addressing) the king; भूयः बभाषे = again spoke.

तात्पर्यम्

दिलीपः यदा 'स्वकीयं जीवं दत्त्वा धेनुं रक्षामि' इति सूचितवान्, तद्वचनं श्रुत्वा सिंहः अहसत् । यदा सः हसितवान् तदा तस्य दंष्ट्राणां प्रभा प्रसृता अभवत् । सा प्रभा गिरेः गुहानाम् अन्धकारं सर्वं चूर्णीकरोति इव भासते स्म । ततः सिंहः किञ्चित् हसित्वा उक्तवान् ।

अन्वयरचना

बभाषे - उक्तवान् *(क्रियापदम्)*	केषाम् अन्धकारम् ?- गिरिगह्वराणाम्
कः बभाषे ? - सः	कैः कुर्वन् ? - दंष्ट्रामयूखैः
कीदृशः सः ? - भूतेश्वरपार्श्ववर्ती	किं कृत्वा बभाषे ? - विहस्य
पुनः कीदृशः ? - कुर्वन्	कथं विहस्य ? - किञ्चित्
किं कुर्वन् ? - शकलानि कुर्वन्	कथं बभाषे ? - भूयः
कं शकलानि कुर्वन् ? - अन्धकारम्	कम् उद्दिश्य बभाषे ? - अर्थपतिम्

विशेषः

अ) पदविवरणम्

१. अव्ययम्
२. अ. 'अन्धकार'शब्दः, पु. द्वि.वि. ए.व.
३. अ. 'गिरिगह्वर'शब्दः, न. ष.वि. ब.व.
४. अ. 'दंष्ट्रामयूख'शब्दः, पु, तृ.वि ब.व.
५. अ. 'शकल'शब्दः, न. द्वि.वि. ब.व.
६. त, 'कुर्वत्'शब्दः, पु. प्र.वि. ए.व.
७. अव्ययम्
८. द. 'तद्'शब्दः, पु. प्र.वि. ए.व.
९. न. 'भूतेश्वरपार्श्ववर्तिन्'शब्दः, पु. प्र.वि. ए.व.
१०. अव्ययम्
११. अव्ययम्
१२. इ. 'अर्थपति'शब्दः, पु. द्वि.वि. ए.व.
१३. 'भाष्'धातुः, आ.प. भूत. प्र.पु. ए.व.

आ) समासः

a. गिरेः गह्वराणि - गिरिगह्वराणि - तेषाम् - ष. तत्पुरुषः
b. दंष्ट्राणां मयूखाः - तैः - ष. तत्पुरुषः

१४. एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च ।
अल्पस्य हेतोर्बहु हातुमिच्छन् विचारमूढः प्रतिभासि मे त्वम् ॥

पदविभागः

[a]एकातपत्रम्[1], जगतः[2], प्रभुत्वम्[3], नवम्[4], वयः[5], कान्तम्[6], इदम्[7], वपुः[8], च[9], अल्पस्य[10], हेतोः[11], बहु[12], हातुम्[13], इच्छन्[14], [b]विचारमूढः[15], प्रतिभासि[16], मे[17], त्वम्[18] ।

अन्वयार्थः

एकातपत्रं = (characterised by) only one umbrella; (showing universal sovereignty); जगतः प्रभुत्वं = lordship of the world; वयः=prime of (fresh) youth; इदं कान्तम् = attrative; वपुः = body

(all these); अल्पस्य हेतोः = for a paltry reason; बहु हातुम् = to relinquish all that is big or great; इच्छन् = desirous (of relinquishing all that is big); त्वं = you; विचारमूढः = stupid in discerning; मे = to me; प्रतिभासि = appear.

तात्पर्यम्

राजन् ! त्वं विचारं कर्तुम् असमर्थः । मूढ इवाचरसि । यतो हि, त्वं लघुभूतायाः धेनोः कारणात् तव शरीरम्, राज्यं, सम्पत्, प्रभुत्वं सर्वं त्यक्तुम् इच्छसि किल । अतः त्वं मूढः इति मे मतिः ॥

अन्वयरचना

(अस्ति)
किम् अस्ति - प्रभुत्वम्
कीदृशं प्रभुत्वं ? - एकातपत्रम्
कस्य प्रभुत्वं ? - जगतः
पुनः किम् अस्ति ? - वयः
कीदृशं वयः ? - नवम्
पुनः किमस्ति ? - वपुः
कीदृशं वपुः ? - कान्तम्
प्रतिभासि ? - लक्ष्यसे *(क्रियापदम्)*
कः ? - त्वम्
कीदृशः त्वम् ? - विचारमूढः
कस्मै प्रतिभासि ? - मे
पुनः कीदृशः ? - इच्छन्
किं कर्तुम् इच्छन् ? - हातुम्
कथं हातुम् ? - बहु
कस्मात् हातुम् ? - हेतोः
कस्य हेतोः ? - अल्पस्य

विशेषः

अ) पदविवरणम्

१. अ. 'एकातपत्र'शब्दः, न. प्र.वि. ए.व.

२. त. 'जगत्'शब्दः, न. ष.वि. ए.व.

३. अ. 'प्रभुत्व'शब्दः न. प्र.वि. ए.व.

४. अ. 'नव'शब्दः न. प्र.वि. ए.व.

५. स. 'वयस्'शब्दः न. प्र.वि. ए.व.

६. अ. 'कान्त'शब्दः न. प्र.वि. ए.व.

७. म. 'इदम्'शब्दः न. प्र.वि. ए.व.

८. ष्. 'वपुष्'शब्दः न. प्र.वि. ए.व.

९. अव्ययम्

१०. अ. 'अल्प'शब्दः पु. ष.वि. ए.व.

११. उ. 'हेतु'शब्दः पु. पं.वि. ए.व.

१२. उ 'बहु'शब्दः न. द्वि.वि. ए.व.

१३. अव्ययम् (प्र)

१४. त. 'इच्छत्'शब्दः पु. प्र.वि. ए.व.

१५. अ. 'विचारमूढ'शब्दः पु. प्र.वि. ए.व.

१६. 'प्रति'- उपसर्गपूर्वकः 'भा'धातुः, प.प. वर्त. म.पु. ए.व.

१७. द. 'अस्मद्'शब्दः त्रि. ष.वि. ए.व.

१८. द. 'युष्मद्'शब्दः त्रि. प्र.वि. ए.व.

आ) समासः

a. एकम् आतपत्रम् यस्मिन् तत् - एकातपत्रम् - बहुव्रीहिः

b. विचारे मूढः - सप्तमीतत्पुरुषः

१५) भूतानुकम्पा तव चेदियं गौरेका भवेत्स्वस्तिमती त्वदन्ते ।
जीवन्पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ ! पितेव पासि ॥

पदविभागः

[a]भूतानुकम्पा[1], तव[2], चेत्[3], इयम्[4], गौः[5], एका[6], भवेत्[7], स्वस्तिमती[8], [b]त्वदन्ते[9], जीवन्[10], पुनः[11], शश्वत्[12], उपप्लवेभ्यः[13], प्रजाः[14], प्रजानाथ[15], पिता[16], इव[17], पासि[18] ॥

अन्वयार्थः

तव = To you; भूतानुकम्पा = compassionate towards animals; चेत् = suppose (If you have compassion for beings and allow the cow to survive); त्वदन्ते = after your death; इयम् = this; एका = only; गौः = cow (only this cow); स्वस्तिमती भवेत् = would be safe; प्रजानाथ ! = oh ! (you the) Lord of people; जीवन् पुनः = if (you are) alive; पिता इव = like a father; प्रजाः = the people; उपप्लवेभ्यः = from calamities; शश्वत् = always; पासि = protect.

तात्पर्यम्

हे राजन् ! यदि त्वं भूतदयां प्रदर्श्य धेनुं रक्षितुं प्रयत्नं करोषि तर्हि सः प्रयत्नोऽपि युक्तिहीनः । यदि तव जीवं दत्त्वा धेनुं रक्षसि तर्हि तव नाशानन्तरं इयम् एका गौः क्षेमेण जीवति । यदि त्वं जीवसि तर्हि अनेकाः प्रजाः रक्षसि । स्वकीयप्राणैः एकस्याः धेनोः रक्षणम् उचितं वा ? जीवं प्राप्य कोटिशः जनानां रक्षणम् उचितं वा ? अत्र युक्तिः कथम् ? त्वमेव चिन्तय ॥

अन्वयरचना

(अस्ति) चेत् - *क्रियापदम् (अध्याहारः)*
का ? - भूतानुकम्पा
कस्य भूतानुकम्पा ? - तव
भवेत् - *क्रियापदम्*
का भवेत् ? - गौः
कीदृशी भवेत् ? - स्वस्तिमती
पुनः कीदृशी ? - एका
पुनः कीदृशी ? - इयम्

कदा भवेत् ? - त्वदन्ते

प्रजानाथ ! - राजन् !

पासि - रक्षसि

कः ? - (त्वम्)

कीदृशः त्वम् ? - जीवन्

काः पासि ? - प्रजाः

कः इव पासि ? - पिता इव

कदा पासि ? - शश्वत्

केभ्यः पासि ? - उपप्लवेभ्यः

विशेषः

अ) पदविवरणम्

१. अ. 'भूतानुकम्पा'शब्दः स्त्री. प्र.वि. ए.व.

२. द. 'युष्मद्'शब्दः, त्रि. ष.वि. ए.व.

३. अव्ययम्

४. म. 'इदम्'शब्दः, स्त्री. प्र.वि. ए.व.

५. ओ. 'गो'शब्दः स्त्री. प्र.वि. ए.व.

६. आ. 'एका'शब्दः स्त्री. प्र.वि. ए.व.

७. 'भू'धातुः प.प. *सम्भावना, प्र.पु. ए.व.

८. ई. 'स्वस्तिमती'शब्दः, स्त्री. प्र.वि. ए.व.

९. अ. 'त्वदन्त'शब्दः, न. स.वि. ए.व.

१०. त. 'जीवत्'शब्दः पु. प्र.वि. ए.व.

११. अव्ययम्

१२. अव्ययम्

१३. अ. 'उपप्लव'शब्दः, पु. पं.वि. ब.व.

१४. आ. 'प्रजा'शब्दः स्त्री. प्र.वि. नित्य. ब.व.

१५. अ. 'प्रजानाथ'शब्दः, पु. सं. प्र. वि. ए.व.

१६. ऋ. 'पितृ'शब्दः पु. प्र. वि. ए.व.

१७. अव्ययम्

१८. 'पा'धातुः प.प. वर्त. म.पु. ए.व.

आ) समासः

a. भूतेषु अनुकम्पा - सप्तमीतत्पुरुषः

b. तव अन्तम् - त्वदन्तम् - तस्मिन् - त्वदन्ते - षष्ठीतत्पुरुषः

* The word 'सम्भावना' means 'may be'. The words like भवेत्, पठेत्, वदेत्, पतेत् - are verbal forms used in the following meanings respectively - may exist, may read, may speak, may fall.

४. विशेषविषयाः

(अ) अलङ्काराः

रूपकालङ्कारः (Metaphor)

Identity between Upamana and Upameya is Rupaka. It does not, like similie, state that one thing is like another, but takes that for granted and proceeds as if two things were one.

Eg. - मुखचन्द्रः - Moon-face

अयं राजा परमेश्वरः । - This king is the Lord.

अहं देवस्य पादाम्बुजं नमामि । - I bow to the lotus flower called feet of God.

रामस्य मुखचन्द्रं दृष्ट्वा प्रजाः सन्तुष्टाः । - Seeing the moon, that is the face of Rama, subjects were happy.

In all these examples identity between उपमान and उपमेय i.e., face and moon, king and Lord feet and lotus flower is mentioned. Therefore it is called Rupakalankara.

अतिशयोक्तिः (Hyperbole)

Here उपमेय is swallowed by उपमान. In the place of Upameya we use upamana only. Eg. पश्य नीलोत्पलद्वन्द्वम् (Pointing the eyes is stated - 'Look at the pair of blue

lotuses'). Seeing a brave man coming, one says like this सिंहः आगच्छन् अस्ति A lion is coming

अर्थान्तरन्यासः (Arthantaranyasa Alankara)

Where a particular statement is justified by a general statement or vice-versa it is Arthantaranyasa.

Eg. - हनुमान् अब्धिम् अतरत् दुष्करं किं महात्मनाम् Hanuman crossed the ocean. Nothing is impossible to great men. Here a particular statement - Hanuman crossed the ocean - is justified by a general statement - Nothing is impossible to greatmen.

See another example-

गुणवज्जनसंसर्गात् याति नीचोऽपि गौरवम् ।
पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते ॥

Even a mean person is respected if he is in the association of meritorious people. The thread used in making a garland, is put on the head. Here a general statement (first sentence) is justified by the particular statement (second sentence)

श्लेषालङ्कारः (Pun)

If a word in a sentence is capable of more than one application, it is slesha

Eg. - १. कादम्बरीरसज्ञानाम् आहारोऽपि न रोचते ।

Those who tasted the sentiments of Kadambari (a famous work of Bana) do not like food.

Here the word कादम्बरी has another meaning - 'Liquor', So the sentence means - Those who tasted liquor do not like food.

२. माघे मेघे गतं वयः ।

Here माघः means 1) the month called magha and 2) the works of poet magha, मेघः - means - cloud and meghaduta the work of Kalidasa "मेघदूतम्" वयः means 1)bird and 2)life.

So the sentence conveys two meanings

1) A bird passed through the cloud in the month Magha
2) Whole life was spent in the study of Magha Kavya and Meghaduta Kavya.

आ) समासाः

From the previous six lessons we get an outline of the compounds. Now, let us know about the identification of the compound words.

There is a statement 'अर्थवत् समासः' to the effect that compound (is) in accordance with sense. Therefore a compound is identified after carefully studying the sense of the compound. Whether Tatpurusha, Karmadharaya or Bahuvrihi, it is only by examining the sense of the compound word that the compound is designated. The same compound word may be designated differently by splitting the compound severally carrying different senses.

Thus the compound is decisively designated after the sense.

Observe the following illustrations as to how the same compound word takes different names though different senses.

१. मारुतिः रामदासः अस्ति । Anjaneya is Rama's servant. रामस्य दासः = रामदासः - The compound is dissolved into sentence in accordance with षष्ठी तत्पुरुष.

२. रमेश इति एकः धनिकः । सः रामदासः । There is rich man by name Ramesha. He has a servant by name Rama.

रामः दासः यस्य सः - रामदासः Here the compound is dissolved into sentence in the sense of बहुव्रीहि ।

Thus, the single compound word रामदास can be differently dissolved depending on the meaning and therefore gets different names.

Point out the inner differences and identify the following compound words by carefully observing the sense

१. नृपसभा - King's assembly
२. रक्तवस्त्रम् - Red cloth
३. कृष्णमुखो वानरः - Black faced monkey
४. दीर्घबाहुः - Long armed
५. सुन्दोपसुन्दौ - Sunda and Upansunda
६. उपनगरम् - Near the city

५. संस्कृतसाहित्यपरिचयः
खण्डकाव्यानि दूतकाव्यानि च

खण्डकाव्यम् –

संस्कृतपद्यकाव्यस्य अपरः प्रभेदः खण्डकाव्यम् । खण्डकाव्यं स्वरूपेण भावगीतम् इव । महाकाव्ये इव खण्डकाव्ये सर्गसंख्याविषये वा, श्लोकसंख्या - विषये वा कोऽपि नियमः नास्ति । केषुचित् काव्येषु पञ्चषाः श्लोकाः भवेयुः, केषुचित् षट्सप्तशतं श्लोकाः भवेयुः । श्लोकेषु परस्परं सम्बन्धः आवश्यकः इत्यपि नास्ति । प्रत्येकं श्लोकः अपि पृथक् काव्यमिव रसभावादिपरिपूर्णः भवति । शृङ्गारः, नीतिः, भक्तिः, धर्मः, सन्देशः इत्यादयः विषयाः खण्डकाव्येषु वर्णिताः दृश्यन्ते ।

प्रसिद्धानि कानिचित् खण्डकाव्यानि

मेघदूतम् / ऋतुसंहारः	—	कालिदासः
गाथासप्तशती	—	हालराजः
आर्यासप्तशती	—	गोवर्धनः
शृङ्गारशतकम्	—	भर्तृहरिः
अमरुशतकम्	—	अमरुकः
भामिनीविलासः	—	जगन्नाथः

दूतकाव्यम् -

खण्डकाव्यस्य एव अपरः प्रभेदः दूतकाव्यम् । इष्टं जनं प्रति दूतद्वारा सन्देशप्रेषणमेव अत्रत्यं वैशिष्ट्यम् । रामायणे रामः सीतां प्रति आञ्जनेयद्वारा सन्देशं प्रेषयति । नलः दमयन्तीं प्रति हंसद्वारा सन्देशं प्रेषयति । एतस्मात् सन्देशप्रेषणव्यवहारात् प्रभावितः सन् कालिदासः मेघदूतं लिखितवान् इति प्रतिभाति । मेघदूततः एव दूतकाव्यानाम् आरम्भः जातः इति वक्तुं शक्यते । (मेघदूतं खण्डकाव्यस्य उदाहरणम् इति पूर्वं सूचितम् अस्ति । दूतकाव्यं खण्डकाव्यस्य एव अन्यः प्रभेदः इति कारणतः तत्रापि तस्य नाम लिखितम् ।)

मेघदूतम् –

कश्चित् यक्षः शापवशात् स्वप्रियायाः बहुदूरे रामगिर्याश्रमे निवसति । आषाढमासस्य आरम्भे मेघं दृष्ट्वा सः विरहोत्कण्ठितः भवति । तं मेघमेव दूतं कृत्वा तद्द्वारा प्रियायै सन्देशं प्रेषयति । रामगिरितः अलकानगरीं प्रति गमनमार्गस्य, मार्गे स्थितानां नगराणां, नदीनां, जनपदानां च वर्णनं, पत्नीं प्रति सन्देशनिरूपणं च अतीव मनोहरशैल्या अत्र निरूपितम् अस्ति ।

मेघदूतस्य शैल्या सौन्दर्येण च प्रभाविताः सन्तः बहवः अनन्तरं दूतकाव्यानि रचितवन्तः ।

प्रसिद्धानि कानिचित् दूतकाव्यानि

हंससन्देशः	—	वेदान्तदेशिकः
पवनदूतम्	—	धोयीकविः
चन्द्रदूतम्	—	जम्बूकविः
घटकर्परः	—	घटकर्परः

६. संस्कृतग्रन्थकारपरिचयः

कालिदासः

वरकविः कविकुलगुरुः इति प्रसिद्धस्य कालिदासस्य कालः देशः व्यक्तित्वम् इत्यादीनां विषये निर्णेतुं योग्यं प्रमाणं न लभ्यते । केषाञ्चन विदुषाम् अभिप्रायेण

सः चतुर्थशतके आसीत् इति अङ्गीकर्तुं शक्यते । तस्य काव्येषु उज्जयिन्याः वर्णनम् अधिकं दृश्यते इति कारणतः तस्य जन्मस्थलम् उज्जयिनी स्यात् इति अभिप्रायः अस्ति । कालिदासः रघुवंशं, कुमारसम्भवम् इति महाकाव्यद्वयम्, ऋतुसंहारं, मेघदूतमिति खण्डकाव्यद्वयं, मालविकाग्निमित्रं, विक्रमोर्वशीयम्, अभिज्ञान-शाकुन्तलम् इति नाटकत्रयं च लिखितवान् ।

कवित्वं, शास्त्रज्ञानं, लोकानुभवः - एतेषां त्रयाणाम् अपि सुन्दरः समन्वयः कालिदासस्य कृतिषु दृश्यते । भारतीयानाम् उत्कृष्टा जीवनपरम्परा अपि तासु प्रतिबिम्बिता अस्ति ।

अत्यन्तं समुचितायाः उपमायाः निबन्धने कालिदासः अतीव निपुणः । तस्य सर्वासु कृतिषु एषः अंशः स्फुटं दृश्यते । **'उपमा कालिदासस्य'** इति उक्तिस्तु सुप्रसिद्धा एव ।

न केवलं संस्कृतसाहित्यम्, अपि तु समग्रं भारतीयसाहित्यमेव कालिदासात् प्रभावितम् अस्ति इति वक्तुं शक्यते । अतः एव सः वस्तुतः कविकुलगुरुः ।

भारविः

भारवेः जन्मनाम दामोदरः । एतस्य पिता नारायणस्वामी । दामोदरः चालुक्यराजस्य विष्णुवर्धनस्य मित्रम् आसीत् । एषः गङ्गराजस्य दुर्विनीतस्य आस्थाने, पल्लवराजस्य सिंहविष्णोः आस्थाने च कञ्चित् कालम् आसीत् इत्यपि ज्ञायते । क्रि. श. षष्ठे शतके भारविः आसीत् ।

किरातार्जुनीयं भारवेः सुविख्यातं काव्यम् । महाभारते विद्यमानमेव कथावस्तु स्वीकृत्य भारविः एतत् महाकाव्यं रचितवान् अस्ति । विशिष्टार्थगर्भितानां वाक्यानां प्रयोगे भारविः अत्यन्तं निपुणः । 'हितं मनोहारि च दुर्लभं वचः', 'सहसा विदधीत न क्रियाम्' इत्यादयः तस्य प्रयोगाः एतम् अभिप्रायं समर्थयन्ति । **''भारवेः अर्थगौरवम्''** इति उक्तिः अपि विमर्शकलोके प्रसिद्धा । एकमेव महाकाव्यं लिखित्वा अपि भारविः स्वकवित्वेन, पाण्डित्येन, वर्णनकौशलेन च कविप्रपञ्चे विशिष्टं स्थानं प्राप्तवान् ।

माघः

गुर्जरदेशस्य राज्ञः श्रीवर्मलातस्य मन्त्री सुप्रभदेवः । सुप्रभदेवस्य पौत्रः माघः इति श्रूयते । क्रि. श. सप्तमे शतके सः आसीत् इति विदुषाम् अभिप्रायः । माघः भारवेः अनन्तरकालीनः ।

''शिशुपालवधं'' माघेन विरचितम् अद्वितीयं महाकाव्यम् । भारवेः किरातार्जुनीयं परिशील्य 'तत्सदृशमेव काव्यं लेखनीयम्' इति बुद्ध्या एव माघः शिशुपालवधं रचितवान् इति भासते । यतः बहुषु विषयेषु किरातार्जुनीयस्य साम्यम् एतस्मिन् काव्ये दृश्यते । माघः राजनीतिविशारदः । अलङ्कारशास्त्रे व्याकरणशास्त्रे च तस्य महत् पाण्डित्यम् आसीत् । स्वकीयस्य नानाविषयकस्य अपारज्ञानस्य च प्रदर्शनं कृतवान् अस्ति सः शिशुपालवधे । नूतनशब्दानां प्रयोगे अपि सः अत्यन्तं निपुणः । शब्दानाम् अक्षयः सङ्ग्रहः एव तस्मिन् आसीत् इति वक्तुं शक्यते ।

भारविः इव माघः अपि एकमेव महाकाव्यं लिखित्वा अपि महाकविपदं प्राप्तवान् ।

श्रीहर्षः

श्रीहर्षः कन्याकुब्जस्य नृपस्य विजयचन्द्रस्य आस्थानविद्वान् आसीत् । विजयचन्द्रस्य पुत्रस्य जयन्तचन्द्रस्य आस्थाने अपि सः आसीत् इति श्रूयते । तस्य पिता श्रीहीरः । माता मामल्लदेवी । श्रीहर्षः द्वादशशतके आसीत् । तर्क-व्याकरण-वेदान्तादिषु शास्त्रेषु श्रीहर्षः उद्दामपण्डितः । सर्वाणि अपि पुराणानि सः सम्यक् जानाति स्म । श्रीहर्षेण रचितं महाकाव्यं नैषधीयचरितम् । नलदमयन्त्योः कथा अत्र वर्णिता अस्ति । श्रीहर्षस्य भाषा अत्यन्तं प्रौढा । शब्दकर्कशता, दुरूह्या कल्पना, अर्थक्लिष्टता, श्लेषप्रियता च नैषधीयचरिते सर्वत्र दृश्यते ।

श्रीहर्षः अन्यान् अपि कांश्चित् ग्रन्थान् लिखितवान् इति उल्लेखः दृश्यते । परन्तु ते सर्वे न उपलभ्यन्ते । खण्डनखण्डखाद्यम् इति एकः ग्रन्थः उपलभ्यते । तस्मिन् ग्रन्थे तार्किकमतस्य खण्डनं कृतं दृश्यते ।

* * *

ॐ

संस्कृतभारती

पत्रालयद्वारा संस्कृतम्

SAMSKRIT THROUGH CORRESPONDENCE

कोविदः - ७

सप्तमः पाठः - प्रश्नाः

I. एतेषां प्रश्नानाम् उत्तराणि लिखत –

१. इन्द्रः नलं किं प्रार्थितवान् ?

२. इन्द्रपदवी कथं लभ्यते ?

३. खण्डकाव्यानां स्वरूपं किम् ?

४. दूतकाव्येषु मेघदूतस्य वैशिष्ट्यं किम् ?

II. एतेषां विग्रहवाक्यानि लिखत –

१. कृष्णसखः, २. भीमार्जुनौ ३. नीलवस्त्रम्

को(इं)-VII, अक्टो-९८-५००

K_E7

PRINTED BOOK

(clause 128 of p.o. Guide, part-1)

सविधे,

_____

_____

_____

_____ [ ][ ][ ][ ][ ][ ]

Dr. Demian Martins

संस्कृतम् संस्कृतम् संस्कृतम् संस्कृतम् संस्कृतम् संस्कृतम्

CONVENER

SAMSKRIT THROUGH CORRESPONDENCE

"AKSHARAM", 8TH CROSS, II PHASE
GIRINAGARA, BANGALORE-560 085
PHONE : 6721052